ऋक्षाननो वानरतुल्यचेष्टो बिभर्त्ति दण्डं फलमामिषं च। कूर्चीं मनुष्यः कुटिलैश्च केशैर्मृगेश्वरस्यान्तगतस्त्रिभागः १५। पुष्पप्रपूर्णेन घटेन कन्या मलप्रदिग्धाम्बरसंवृताङ्गी। वस्त्रार्थसंयोगमभीप्समाना गुरोः कुलं वाञ्छति कन्यकाद्यः १६। पुरुषः प्रगृहीतलेखनिः श्यामो वस्त्रशिरा व्ययायकृत्। विपुलं च बिभर्त्ति कार्मुकं रोमव्याप्ततनुश्च मध्यमः १७। गौरी सुधौताग्रदुकूलगुप्ता समुच्छ्रिता कुम्भकटाहहस्ता। देवालयं स्त्री प्रयता प्रवृत्ता वदन्ति कन्यान्त्यगतन्त्रिभागम् १८। वीथ्यन्तरापणगतः पुरुषस्तुलावानुन्मानमानकुशलः प्रतिमानहस्तः। भाण्डं विचिन्तयति तस्य च मूल्यमेतद्रूपं वदन्ति यवनाः प्रथमं तुलायाः १९। कलशं परिगृह्य विनिःपतितुं समभीप्सति गृध्रमुखः पुरुषः। क्षुधितस्तृषितश्च कलत्रसुतान्मनसैति तुलाधरमध्यगतः २०। विभीषयन् तिष्ठति रत्नचित्रितो वने मृगान् काञ्चनतूणवर्मभृत्। फलामिषं वानररूपभृन्नरस्तुलावसाने यवनैरुदाहृतः २१। वस्त्रैर्विहीनाऽऽभरणैश्च नारी महासमुद्रात् समुपैति कूलम्। स्थानच्युता सर्पनिबद्धपादा मनोरमा वृश्चिकराशिपूर्वः। स्थानसुखान्यभिवाञ्छति नारी भर्तृकृते भुजगावृतदेहा। कच्छपकुम्भसमानशरीरा वृश्चिकमध्यमरूपमुशन्ति२३। पृथुलचिपिटकूर्मतुल्यवक्त्रः श्वमृगवराहशृगालभीषकारी। भवति च मलयाकरप्रदेशं मृगपतिरन्त्यगतस्य वृश्चिकस्य २४। मनुष्यवक्त्रोऽश्वसमानकायो धनुर्विगृह्यायतमाश्रमस्थः। क्रतूपयोज्यानि तपस्विनश्च ररक्ष पूर्वो धनुषस्त्रिभागः २५। मनोरमा चम्पकहेमवर्णा भद्रासने तिष्ठति मध्यरूपा। समुद्ररत्नानि विघट्टयन्ती मध्यत्रिभागो धनुषः प्रदिष्टः २६। कूर्चीं नरो हाटकचम्पकाभोवरासने दण्डधरो निषण्णः। कौशेयकान्युद्वहतेऽजिनं च तृतीयरूपं नवमस्य राशेः २७। रोमचितोमकरोपमदंष्ट्रः सूकरकायसमानशरीरः। योक्त्रकजालकबन्धनधारी रौद्रमुखो मकरप्रथमस्तु २८। कलास्वभिज्ञाब्जदलायताक्षी श्यामा विचित्राणि च मार्गमाणा। विभूषणालङ्कृतलोहकर्णा योषा प्रदिष्टा मकरस्य मध्ये २९। किन्नरोपमतनुः सकम्बलस्तूणचापकवचैः समन्वितः। कुम्भमुद्वहति रत्नचित्रितं स्कन्धगं मकरराशिपश्चिमः ३०। स्नेहमद्यजलभोजनागमव्याकुलीकृतमनाः सकम्बलः। कोशकारवसनोऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः ३१। दग्धे शकटे सशाल्मले लोहान्याहरतेऽङ्गना वने। मलिनेन पटेन संवृता भाण्डैर्मूर्ध्नि गतैश्च मध्यमः ३२। श्यामः सरोमश्रवणः किरीटी त्वक्पत्रनिर्यासफलैर्बिभर्त्ति। भाण्डानि लोहैर्व्यतिमिश्रितानि सञ्चारयत्यन्तगतो घटस्य ३३। स्रुग्भाण्डमुक्तामणिशङ्खमिश्रैर्व्याक्षिप्तहस्तः सविभूषणश्च। भार्याविभूषार्थमपां निधानं नावा प्लवत्यादिगतो झषस्य ३४। अत्युच्छ्रितध्वजपताकमुपैति पोतं कूलं प्रयाति जलधेः परिवारयुक्ता। वर्णेन चम्पकमुखा प्रमदा त्रिभागो मीनस्य चैष कथितो मुनिभिर्द्वितीयः ३५। श्वभ्रान्तिके सर्पनिवेष्टिताङ्गो वस्त्रैर्विहीनः पुरुषस्त्वटव्याम्। चौरानलव्याकुलितान्तरात्मा विक्रोशतेऽन्त्योपगतो झषस्य ३६।” एतेषां स्वरूपोत्कीर्त्तनेन नष्टजातकोद्धारः तत्रैव दर्शितः तथा षट्पञ्चाशिकायां चौरस्वरूपविज्ञानमपि एतदनुसारेण कार्यमित्युक्तम् यथा “अंशकाज्ज्ञायते द्रव्यं दृक्काणैस्तस्करास्तथा” “होरानवांशप्रतिमं विलग्नं लग्नाद्रविर्यावति वा दृक्काणे। “तस्माद्वदेत्तावति वा विलग्नं प्रष्टुः प्रसूताविह शास्त्रमाह” वृहज्जा०। राशिभेदे तदधिपाश्च “स्वपञ्चनवमानां ये राशीनामधिपा ग्रहाः। ते द्रेक्काणाधिपा राशौ द्रेक्काणास्त्रयएव हि” ज्यो०त० यथा मेषस्य स्वामी कुजः १द्रेक्काणेशः। तत्पञ्चम सिंहराशेः स्वामी रविः स मेषस्य २द्रेक्काणेशः मेषतः नवमो धनुराशिस्तस्येशः जीवः मेषस्य ३द्रेक्काणेशः एवं वृषादेरूह्यम्। द्रेष्काण द्रेक्काण द्रेकाणा अपि तत्रार्थे

**दृक्क्षेप** ६त०। १दृष्टिपाते सू०सि० उक्ते २दृग्वृत्तजत्रान्तरालस्थशररूपे क्षेपे च यथा

“अथाभ्यासुपयुक्तं दृक्क्षेपं लम्बनोपयुक्तां दृग्नतिं चाह” रङ्ग०। “मध्योदयज्ययाभ्यस्ता त्रिज्याप्ता वर्गितं फलम्। मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम्। तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः” सू०। पूर्वोक्तमध्यज्या पूर्वानीतोदयाभिधयोदयज्यया। अस्या ज्यारूपत्वाद्दृग्ज्ययेत्युक्तम्। गुणिता त्रिज्यया भक्ता फलं वर्गितं वर्गः सञ्जातो यस्य तत्। फलस्य वर्गः कार्य इत्यर्थः। मध्यज्याया वर्गे विश्लिष्टं हीनं वर्गितं फलं कार्यम्। शेषान्मूलं दृक्क्षेपः तत्त्रिज्ययोर्यौ वर्गौ तयोरन्तरान्मूलं शङ्कुः। स आनीतः शङ्कुर्दृग्गतिसञ्ज्ञो भवति। न तु शङ्कुमात्रम्। अत्रोपपत्तिः। त्रिभोनलग्नस्य दृग्ज्यानयनार्थं क्षेत्रम्। मध्यलग्नदृग्ज्याकर्णस्त्रिभोनलग्नस्य याम्योत्तरवृत्तात् प्रागपरस्थितत्वेन